No. ४६०८

Title गरुड़पुराणं प्रेतकल्पः

Author नीलकण्ठः गोविन्दसूरिसूनुः

Extent ६४ पत्राणि Age सं. १७७५

Subject पुराणम्

𑆓𑆫𑆶𑆝𑆥𑆶𑆫𑆳𑆟𑆥𑇀𑆫𑆼𑆠𑆑𑆭𑇀𑆥𑆂

[illegible]° 𑇘

५८

गारूडपुराणपत्र ६४

श्रीगणेशायनमः विभीषणावरदायश्रीरामचंद्रायनमः श्रीशारदायैनमः सूतउवाच धर्म
१ दृढबद्धमूलो वेदस्कंधः पुराणशाखाढ्यः क्रतुकुसुमोमोक्षफलोमधुसूदनपादपोजयति
१ नारदउवाच भवत्प्रसादाद्वैकुंठत्रैलोक्यंसचराचरं मयाविलोकितं देवमुत्तमाधममध्य स २
मं २ भूर्लोकात्सत्यपर्यंतं पुरंयाम्यंविनाप्रभो भूर्लोकःसर्वलोकानांप्रचुरःसर्वजंतुषु ३
मानुष्यंतत्रदुर्लभं तत्रानांभुक्तिमुक्त्योःफलप्रदं अतः सुकृतिनांलोकोनभूतोनभविष्यति ४ गा
यंतिदेवाःकिलगीतकानिधन्यास्तुयेभारतभूमिभागे स्वर्गापवर्गस्यफलार्जनाभवंतिभू
यः पुरुषाःसुरत्वात् ५ मानुष्यंलभतेकस्मात्प्राप्नोतितत्कथं त्रिपतेकः सुरश्रेष्ठदेह
मात्रिमकुरुचित् ६ कर्यातितानीद्रियाणि अस्पृश्यः सकथंभवेत् ककर्माणिकृतानी
हकथंमुक्तिमवाप्नोति ७ प्रसादंकुरुमेमोहंछेत्तुमर्हसिशोभनः विनतागर्भसंभूतःकाश्यप
पस्तववाहनं ८ इतिप्रीतिपरोभूत्वाकथयस्वयथातथ्यं यमलोकेकथंयातिविष्णुलो राम
१

केचमानवाः ९ श्रीभगवानुवाच वैनतेयमहाभागश्रृणुसर्वंयथातथं प्रीसाकथयतोमसं
सुहृद्दस्तिभवान्मम १० परस्पयोषितंहृत्वाब्रह्मस्वमपहृत्यच अरण्येनिर्जलेदेशेजायतेब्र
ह्मराक्षसः ११ हीनजातौप्रजायेतरत्नानामपहारकः यंयंकाममभिध्यायेत्तत्तल्लिंगोभिजा
यते १२ नैनंछिंदंतिशस्त्राणिनैनंदहतिपावकः नचैनंक्लेदयंत्यापोनशोषयतिमारुतः १३
वाक्चक्षुर्नासिकाकर्णौगुदोमूत्रस्पर्शसंचरः अण्डजादिषुजंतूनांछिद्राण्येतानिसर्वदा १४
नाभेस्तुमूर्धपर्यंतमूर्ध्वंछिद्राणिचाष्टधा अतःसुकृतिनोयेचऊर्ध्वछिद्रेणयांतिते १५
मृतादौवार्षिकंपावत्तावत्सम्यग्विधिनाखग कार्याणिसर्वकर्माणिनिर्धनैरपिमानवैः
१६ देहेयत्रवसेज्जंतुस्तत्रभुंक्तेशुभाशुभं मनोवाक्कायजनितंतत्रतत्रखगेश्वर १७
मृतःसुखमवाप्नोतिमायायाशैर्नबध्यते पापकृद्दुःखमाप्नोतिस्वविकर्मणिरतोहियः
१८ इतिश्रीगरुडपुराणेप्रेतकल्पेसारोद्धारःप्रथमोध्यायः १ श्रीभगवानुवाच एवं

२

2

तेकथितंतात्सर्वंजीवितस्यविचेष्टितं मानुषाणांहितार्थायप्रेतत्त्वविनिवृत्तये १ चतुराशीतिलक्षाणि
चतुर्भेदाश्चजंतवः अंडजाःस्वेदजाश्चैवउद्भिदाश्चजरायुजाः २ एकविंशतिलक्षाणि अंडजाःपरि
कीर्त्तिताः स्वेदजाश्चतथैवोक्ताउद्भिजाश्चक्रमेणतु ३ जरायुजास्तथासंख्यामानुषाद्याःप्रचक्ष
ते सर्वेषांचैवजंतूनांमानुषत्वंहिदुर्लभं ४ पंचेंद्रियविधानेतुबहुपुण्यैरवाप्यते ब्राह्मणाःक्षत्रि
यावैश्याःशूद्रास्तुरीयजातयः ५ रजकश्चर्मकारश्चनटोवरुडएवच कैवर्त्तभेदभिल्लाश्चसप्तैते
अंत्यजाःस्मृताः ६ म्लेच्छदुश्चविभेदैश्चजातिभेदाह्ययोदश जंतूनामिहसर्वेषांभेदाश्चैवसहस्र
शः ७ आहारोमैथुनंनिद्राभयंक्रोधस्तथैवच जायतेसर्वजंतूनांविवेकोदुर्लभःपरः ८ एकपा
दाद्विपैश्चदेशभेदाहिमानवाः कृष्णसारोमृगोयत्रधर्मदेशःसउच्यते ९ ब्रह्माद्याऋषयो
देवाःपितरोमुनयःस्वग धर्मःसत्यंचविद्याचतत्रतिष्ठतिसर्वदा १० भूतानांप्राणिनःश्रेष्ठाःप्रा
णिनांमतिजीविनः मतिमत्सुनराश्रेष्ठानरेषुब्राह्मणाःस्मृताः ११ ब्रह्मणेषुचविद्वांसोविद्वत्सुकृ राम २

- नबुद्धयः क्व तत्त्वबुद्धिषु कर्त्तारः कर्तृषु ब्रह्मवादिनः १२ मानुष्यं यः समासाद्य स्वर्गमोक्षस्य साधनं
द्वयोर्न साधयेदेकं तेनात्मा वंचितो ध्रुवं १३ इक्षुति शतीसहस्रेषु सहस्री लक्षमीपतेः कर्तुं लक्षाधि
पती राज्ये राज्येपि देवसकलचक्रवर्त्तित्वं १४ चक्रधारोपि सुरत्वं सुरत्वलाभे सुरपतित्वं भवितुं सुर
पतिरूर्ध्वगतित्वं तथापि न निवर्त्तते तृष्णा १५ तृष्णया चाभिभूतस्तु नरकं प्रतिपद्यते तृष्णामु
क्ताश्च ये केचित्स्वर्गवासं लभंति ते १६ आत्माधीनः पुमाल्लोके सुखीभवति निश्चितं तथाच
विषयाधीनो दुःखीभवति नान्यथा १७ कुरंगमातंगपतंगभृंगमीना हताः पंचभिरेव पंच ए
कः प्रमादी स कथं न हन्यते यः सेव्यते पंचभिरेकजंतुः १८ पितृमातृमयो बाल्ये यौवने दयिता
मयः पुत्रपौत्रमयः पश्चात्ते मूढो नात्ममयः क्वचित् १९ लोहदारुमयैः पाशैः पुमान्बद्धो विमुच्य
ते पुत्रदारमयैः पाशैर्न तु बद्धः प्रमुच्यते २० मत्वा न ज्ञायते मूढो बालो वृद्धो युवापि वा सुख
दुःखाधिधिको वापि पुनरायाति याति च । २१ सर्वेषां पश्यतामेको म्यजः सर्वं जहाति तत्र

म२

एकः प्रजायते जंतुरेक एव विलीयते २२ एकोनुभुंक्ते सुकृतमेकः प्राप्नोति दुष्कृतं मृतं शरीरमुत्सृ
३ ज्य काष्ठलोष्ठसमं क्षितौ २३ एकः पापानि कुरुते फलं भुंक्ते महाजनः भोक्तारो विप्रमुच्यंते कर्त्ता
3 दोषेण लिप्यते २४ गृहेष्वर्था निवर्त्तंते श्मशानात्सर्वबांधवाः शुभाशुभं कृतं कर्म गच्छंतमनु
गच्छति २५ शरीरं वह्निना दग्धं कृतं कर्म सहस्थितं शुभं वा यदि वा पापं भुंक्ते सर्वत्र मानवः २६
अनस्तमितसूर्ये यत्र दत्तं दानमर्थिनां न जानामीति तद्वित्तं प्रातः कस्य भविष्यति २७ रारटीति
धनं तस्य को मे भर्त्ता भविष्यति न दत्तं द्विजमुख्येभ्यो नाम्नो तीर्थे सुहृज्जने २८ पूर्वजन्मकृता
द्दानाद्यल्लब्धं बहु वाल्पकं तदीदृशं परिज्ञाय धर्मार्थे दीयते धनं २९ धनेन धार्यते धर्मः श्रद्धा
युक्तेन चेतसा श्रद्धाविहीनो धर्मस्तु परत्रेह धर्मभाक् ३० धर्मात्संजायते ह्यर्थो धर्मात्कामोभि
जायते धर्म एवापवर्गाय तस्माद्धर्मं समाश्रयेत् ३१ श्रद्धया धार्यते धर्मो बहुभिर्नार्थराशिभिः
अकिंचना हि मुनयः श्रद्धावंतो दिवं गताः ३२ अश्रद्धया हुतं दत्तं तपस्तप्तं संचयद्भवेत् असत् एम
दित्युच्यते पार्थ न च तत्प्रेत्य चेह न तत्फलं ३३ इति श्रीगरुडपुराणे धर्मकथनं नाम द्वितीयः २ ग रु ३

उउवाच कर्मणाकेन देवेश प्रेतत्वं नैव जायते पृथिव्यां सर्वजातीनां तन्मे ब्रूहि सुरेश्वर १ श्रीभगवानु
वाच शृणु वक्ष्यामि संक्षेपात्क्रियां चाप्यूर्ध्वदेहिकीं स्वहस्तेनैव कार्या प्रेतमोक्षमभीप्सुभिः २ स्त्रीणा
मपि विशेषेण पंचवर्षाधिके शिशौ वृषोत्सर्गादिकं कर्म प्रेतत्वविनिवृत्तये ३ वृषोत्सर्गादृते ना
न्यत्किंचिदस्ति महीतले जीवन्वापि मृतो वापि वृषोत्सर्गं करोति यः ४ प्रेतत्वं न भवेत्तस्य विना दा
नव्रतैर्मखैः गरुडउवाच कस्मिन्काले वृषोत्सर्गं जीवन्वापि मृतोपि वा कुर्वन्किं फलमाप्नो
ति कृतैः श्राद्धैश्च षोडशैः ५ श्रीभगवानुवाच अकृत्वा तु वृषोत्सर्गं कुरुते पिंडपातनं नोपति
२५ ष्ठति त[illegible]यो दातुः प्रेतस्य निःफलं ६ एकादशाहे प्रेतस्य नोत्सृज्यते वृषः प्रेतत्वं सुस्थिरं तस्य द केचित्५
त्तैः श्राद्धशतैरपि ७ गरुडउवाच सर्पादिप्राप्तमृत्यूनां अग्निदाहादिना तथा जलेन शृंगिणा
वापि शस्त्राद्यैर्म्रियते यदि ८ असंस्कृतिमृतानां च कथं शुद्धिर्भवेत्प्रभो एतन्मे संशयं देव छेत्तु
मर्हस्यशेषतः ९ श्रीभगवानुवाच षण्मासे श्रीं[illegible]ः शुद्धिमाप्नोति येन स्त्रियः सार्धमासेन वै
श्यस्तु शूद्रो मासेन शुध्यति १० जीवितस्य मृतस्यैव वृषोत्सर्गं करोति यः गतास्ते पितृलोकं

४ तुक्तऋषिः शातातपोऽब्रवीत् ११ हत्वात्मानात्मनेकानिस्तुतीर्थेम्रियतेयदि ब्रह्मचारीयतिर्भूत्वान
गच्छेद्दश्युभांगतिं १२ वृषोत्सर्गादिकंकृत्वायतिधर्मंसमाचरेत् यतित्वात्मनःस्तुमाप्नोतिसगच्छे
द्ब्रह्मशाश्वतं १३ विकर्मकुरुतेयस्तुशिष्टाचारविवर्जितः वृषोत्सर्गादिकंकुर्यान्नगच्छेद्यम
सादनं १४ पुत्रोवापिपितावापिपौत्रोबंधुजनस्तथा योकारणस्यार्थभागीस्यान्मृतेकुर्याद्वृषो
त्सवं १५ पुत्राभावेतुपत्नीस्याद्दौहित्रोदुहितापिवा पुत्रेषुविद्यमानेषुनान्येनकारयेद्वृषं १६
अकलत्रोऽस्यपुत्रश्चस्वयमेवतुकारयेत् अपुत्रश्चमृतःकश्चित्पत्नीकुर्यात्सपिंडनं १७ भर्त्ता
दिभिश्चविभिः कार्यंपुत्रवत्कुरुतेसदा तस्मात्सर्वप्रयत्नेनस्वयमेवतुकारयेत् १८ गरुडउवा
च पुत्रायस्यनविद्यंतेभ्रातरोनचबांधवाः नपत्नीनचभर्त्तावाकथंतस्यौर्ध्वदैहिकं १९ के
नमुक्तिंप्रपद्यंतेनरानार्योविपद्गताः एषमेसंशयोदेवछेत्तुमर्हस्यशेषतः २० श्रीभगवानु
वाच अपुत्रस्यगतिर्नास्तिस्वर्गोनैवचनैवच येनकेनप्रकारेणपुत्रस्यजननंचरेत् २१ स
पुत्रोवाप्यपुत्रोवानरोनारीयतिस्तथा जीवन्नेवस्वयंकुर्यान्मृतोयत्तपमाप्नुयात् २२ या राम ४

नियानिचदत्तानानिस्वयंदत्तानिमानवैः तानितानिचसर्वाणिउपतिष्ठंतिचाग्रतः २३ भंजनानिविचि
त्राणिभक्ष्यभोज्यानियानिच स्वयंहस्तेनदत्तानिदेहांतेचाक्षयंफलं २४ गोभूहिरण्यवासांसिभोज
नानिपदानिच पत्रपत्रवसेज्जंतुस्तत्रतत्रोपतिष्ठते २५ यावत्स्वस्थशरीरंस्वंतावद्धर्मंसमाचरेत्
अस्वस्थोरितश्चान्यैर्नकिंचित्कर्तुमुत्सहेत् २६ जीवतश्चमृतस्येहनभूतेचोर्ध्वदेहिकं वायुभूतः
क्षुधाविष्टोभ्रमतेचदिवानिशं २७ कृमिःकीटःपतंगोवाजायतेम्रियतेतुसः अस्तुर्भेवसेत्सो
पिजातःसद्योविनश्यति २८ यावत्स्वस्थमिदंशरीरमरुजंयावज्जरादूरतोयावच्चेंद्रियशक्ति
रप्रतिहतायावत्क्षयोनायुषः आत्मश्रेयसितावदेवविदुषाकार्यःप्रयत्नोमहान् संदीप्तेभव
नेचकूपखननंप्रत्युद्यमःकीदृशः २९ इतिश्रीगरुडपुराणेप्रेतकल्पेऊर्ध्वदेहिकोनामतृतीयः
गरुडउवाच स्वहस्तैःकिंफलंदैवपरहस्तैश्चतद्वद रचस्थावस्थैःरसंज्ञैर्वाविधिहीनमयापिवा १
श्रीभगवानुवाच एकागोस्वस्थचित्तस्यह्यातुरस्यचगोशतं सहस्रंम्रियमाणस्यदत्तंवि

दे ५

सं

५ त्तंविवर्जितं २ मत्तस्यैव पुनर्लब्धं विधिपूर्वं नस्मृतं तीर्थपात्रसमायोगात्दैकावै पुण्यफलं हरा ३ पा
त्रे दत्ताखगश्रेष्ठ अहन्यहनि वर्धते दातृदानमपापायं ज्ञानिनां न प्रतिग्रहः ४ विषशीतापहौमंत्र
वह्नौ किं दोषभागिनौ दातव्यं प्रयत्नेन निमित्तेषु विशेषतः ५ अपात्रे सा तु गौ र्दत्ता दातारं नर
कं नयेत् कुलैकविंशतिपूतं गृहीतारं तु पातयेत् ६ देहान्तरे पदाप्राप्य स्वहस्तेन कृतं च यत् भूमि
ष्ठं च धनं यद्द[illegible] हस्तेन [illegible] विशितः ७ तद्दत्फलमवाप्नोति अहं वच्मि खगेश्वर अधनोपि विशेष
शक्तिपांचै वोर्ध्वदेहिकां २ प्रकुर्यान्मोक्षकामश्च निर्धनश्च विशेषतः स्वल्पेनापि हि वित्तेन स्वयं
हस्तेन यत्कृतं ८ तद्दत्तयं भवेत्सर्वं आज्येनेव हुताशनः अदेशकाले यद्दत्तं विधिहीनमथापि वा
१० सर्वसंपूर्णतां याति वृषोत्सर्गे कृते सति एका एकस्य दातव्या बहूनां न कदाचन ११ सा विक्री
ता विभक्ता च दहत्यासप्तमं कुलं तस्मात्सर्वं प्रकुर्वीत त्वं चले जीविते सति १२ गृहीतदानपा
थेयः सुखं याति महाध्वनि अन्यथा क्लिश्यते जंतुः पाथेयरहितः पथि १३ एवं ज्ञात्वा खग राम ५

श्रेष्ठपक्षं समाचरेत् अकृत्वाश्रिपतेपक्षं पुत्रवान्नैव मुक्तिभाक् २४ अपुत्रोपि हि पकुर्या
त्सुरर्थ पाति महाध्वनि अग्निहोत्रादिभिर्यज्ञैर्दानैश्च विविधैरपि २५ न तां गतिमवाप्नोति स्व
कृते वै बयागतिः सर्वेषामिह यत्नानां वृषयज्ञस्तथोत्तमः २६ तस्मात्सर्वप्रयत्नेन वृषयज्ञं
समाचरेत् गरुड उवाच कथयस्व प्रसादेन क्रियां चैवोर्ध्वदैहिकीं कस्मिन्मासे तिथौ कस्यां
विधिना केन तद्भवेत् कृत्वा किं फलमाप्नोति पतन्मे वद सर्वशः २७ श्रीभगवानुवाच का
र्त्तिकादिशुभे मासि हत्ते पयन गोरवौ शुक्लपक्षेथवा कृष्णे द्वादश्यादि तिथौ शुभे २८ शु
भे लग्ने मुहूर्त्ते वा शुचौ देशे समाहितः ब्राह्मणान्हु समाहूय विधिज्ञं शुभलक्षणं २९ जप
होमैस्तथा दानैः प्रकुर्याद्देहशोधनं पुण्येहनि शुनहत्वेग्रहान्देवान्समर्चयेत् ३० होमं
कुर्याद्यथाशक्ति मंत्रैश्च विविधैरपि महाणां स्थापनं पूर्वं पूजनं च खगेश्वर ३१ मातृ
णां पूजनं कुर्याद्वसोर्धाराश्च पातयेत् वह्निं संस्थाप्य तत्रैव पूर्णहोमं तु कारयेत् ३२ सा

त्वग्रामं तु संपूज्य वैष्णवं श्राद्धमाचरेत् वृषं संपूज्य तत्रैव वस्त्रालंकारभूषणैः २४ चतस्रो वत्सत
६ र्यश्च पूर्वं समधिवासयेत् प्रदक्षिणां प्रकुर्वीत होमांते च विसर्जयेत् २५ इमं मंत्रं समुच्चार्य होमां
ते च उदङ्मुखः धर्मस्त्वं वृषरूपेण ब्रह्मणा निर्मितः पुरा २६ तवोत्सर्गप्रभावेन मामुद्धर भ
उ४ वार्णवात् अनेनैव वृषोत्सर्गे कुंभोदकेन तु २७ वह्निमूले समास्थाप्य सोदकं शिर
सि प्रसेत् अभिषिच्य शुभैर्मंत्रैः पावनैर्विधिपूर्वकं २८ तेन क्रीडंति मंत्रेण वृषोत्सर्गे कृ
ते सति आत्मश्राद्धं ततः कुर्याद्दत्वा चान्नं द्विजातये २९ उदकांते चगांतव्यं तत्पुच्छे तर्पणं च
रेत् यदि षंजीवतश्चासौ तत्तद्द्यात्स्वशक्तितः ३० स्वदत्तं परदत्तं वा नेहामुत्रोपतिष्ठते त्रयो
दशनथानुत्र पंच त्रीणि यथाक्रमं ३१ पददानानि कुर्वीत श्रद्धाभक्तिसमन्वितः तिल
पात्राणि कुर्वीत त्रीणि पंच च सप्त वा ३२ ब्राह्मणान्भोजयेत्पश्चादूर्ध्वमेकं च प्रदापयेत् राम
वामे चक्रं प्रकुर्वीत त्रिशूलं दक्षिणे तथा ३४ मूल्यं दत्वाथ तस्यैव वृषमेव विसर्जयेत् एको ६

6

दृष्टविधानेन स्वाहाकारेणाधीमता ३५ कुर्यादेकादशाहं तु द्वादशाहादियत्नतः सपिंडीक
२ रणादर्वाक् कुर्याच्छ्राद्धानि षोडश ३६ ब्राह्मणान्भोजयित्वा तु पददानानि दापयेत् कार्पासो
परि संपूज्य ताम्रपात्रस्थितं हरिं ३७ वस्त्रेणावेष्टितं तस्य अर्घं दद्यात् शुभैः फलैः नावमि
क्षुमयीं कुर्यात् सदसूत्रेणावेष्टयेत् ३८ कांस्यपात्रेष्ठितं छाद्य वैतरणापानिमित्तकं नावमारोह
णं कुर्यात् पूजयेद् रुद्रध्वजे ३९ आत्मवित्तानुसारेणात्र दानमनंतकं भवसागरमग्नानां
शोकतापोर्मिदुःखिनां ४० धर्मप्लवविहीनानां नौरेका हि जनार्दनः एवं संचित्य हृदयेम
न्नः सुकृतिनो नहि ४१ तिलाल्लोहं हिरण्यं च कर्पासं लवणं तथा सप्तधान्यं क्षितिर्गावः ए
कैकं पावनं स्मृतं ४२ तिलपात्रं यथाशक्त्या शय्यादानं तु कारयेत् दीनानाथविशिष्टेभ्यो
दक्षिणाभिश्च तोषयेत् ४३ उपवेश्यासने तु ताम्रवाप्यद्विजसत्तमे एवं ये कुर्वन्ति पत्निस्तु

७ त्रि शिरोघ्नपुत्रिणः ४४ सर्वसिद्धिफलावाप्तिर्यथा ते ब्रह्मचारिणः नित्यं नैमित्तिकं कुर्याद्यावज्जी
वतिमानवः ४५ यत्किंचित्कुरुते धर्ममक्षय्यफलमाप्नुयात् तीर्थयात्राव्रतादीनां श्राद्धं संवत्सरा
दिषु ४६ देवतानां गुरूणां च मातापित्रोस्तथैव च पुण्यं देयं प्रयत्नेन प्रत्यहं वर्धते खग ४७
अस्मिन्पक्षे भूरिदानयः कश्चित्प्रपद्यति ततः स्नात्वा तु यत्सर्वं वेदिकायां यथा किल ४८
पू ५ -यथापूज्यतमो लोके पतयो ब्रह्मचारिणः तथैव प्रतिज्ञं ते लोके सर्वे च नित्यशः ४९ व
२५ दोहं सघनस्यश्रेतमोहं ददामि च तेषां तु परमाल्लोकानिति सत्यं वचो मम ५० पूर्णिमा
स्यां चरेद्वत्सां तिलमेकं विसर्जयेत् सक्रान्तीनां सहस्राणि सूर्यपर्वशतानि च ५१ कृत्वाय
फलमाप्नोति तद्वन्नीलं विसर्जने वत्सतर्यः प्रदानत्वाद्ब्राह्मणेभ्यः प्रदानि च उमामहेश्व
रं चैकं परिधाप्य प्रद्यपयेत् ५२ अतसीपुष्पसंकाशं पीतवाससमच्युतं ये नमस्यंति गोवि -एम
दं न तेषां विद्यते भयं ५२ प्रेतत्वान्मोहयामि छंतो ये च रिष्यंति सत्क्रिया यास्यंति ते परां ल्लो

कानितिसत्यंवचोमम ५३ एतत्तेसर्वमाख्यातंमयात्त्वौर्ध्वदेहिकं पठछ्रुत्वासर्वपापेभ्योमु
च्यतेनात्रसंशयः ५४ श्रुत्वामाहात्म्यमतुलंगुरुडोहर्षमागतः मार्गंषाणांहित्वार्थायपुनः
पप्रच्छकेशवं ५५ इतिश्रीगुरुडपुराणेप्रेतकल्पेऊर्ध्वदेहिकोनामचतुर्थः ४ गुरुडउवा
च भगवन्ब्रूहिमेसर्वंयमलोकस्यनिर्णयं जंतोःप्रयाणमार्गस्यमाहात्म्यंवर्त्मनिर्णयं
१ भगवानुवाच शृणुतार्क्ष्यप्रवक्ष्यामियममार्गस्यनिर्णयं प्रयाणकानिसर्वाणिभुवना
निचषोडश २ षडशीतिसहस्राणियोजनानांप्रमाणतः यमलोकस्यचाध्वानमंतरंमानु
षस्यच ३ सुकृतंदुष्कृतंवापिभुक्त्वालोकेपूर्वार्जितं कर्मयोगाद्यदाकश्चिद्व्याधिरुत्पद्य
तेखग ४ निमित्तमात्रःसर्वेषांकृतकर्मानुसारतः यस्ययोविहितोमृत्युःसएवमवाप्नु
यात् ५ कर्मयोगाद्यदादेहीमुंचत्यत्रनिजंवपुः तदाभूमिगतंकुर्याद्गोमयेनोपलिप्यच
तिलान्दर्भान्विकीर्याथमुखेस्वर्णंविनिक्षिपेत् तुलसीसंनिधौकृत्वासालग्रामशिला

८

लांतथा ७ सेतुसामादिसूक्तैश्च मरणं मुक्तिदायकं विकलेंद्रियसंघाते चैतन्ये जडतां गते ८ प्र
चलंति ततः प्राणाः याम्यैर्निकटवर्तिभिः एकीभूतं जगत्सर्वं दैवी दृष्टिः प्रजायते ९ बीभत्संदा
रुणंरूपंप्राणैः कंठसमाश्रितैः फेनमुद्गिरते कोपि मुखं लालाकुलं भवेत् १० दुरात्मानश्चता
ड्यंते किंकरैः पाशबंधनैः सुखं सुकृतिनस्तत्र नीयंते नाकनायकैः ११ दुःखेन पापिनो यांति
यममार्गे च दारुणे यमश्च तुर्भुजो भूत्वा शंखचक्रगदादिभृत् १२ पुण्यकर्मरतान्सम्यक् स्ने
हान्मित्रवदाचरेत् आहूय पापिनः सर्वान्यमदंडेन तर्जयन् १३ प्रयालंबुदनिर्घोषः अंजना
द्रिसमप्रभः महिषस्थो दुराराध्यो विद्युत्तेजः समद्युतिः १४ योजनत्रयविस्तारदेहो रौद्रोति
भीषणः लोहदंडधरो भीमः पाशपाणिर्दुराकृतिः १५ वक्रनेत्रोतिभयदो दृश्यते याति पा
पिनां अंगुष्ठमात्रः पुरुषो हाहाकुर्वन्कलेवरात् १६ तदैव नीयते दूतैर्याम्यैर्वीक्षन्स्वकं
गृहं निर्विचेष्टं शरीरं तु प्राणैर्मुक्तं जुगुप्सितं १७ अस्पृश्यं जायते तूर्णं दुर्गंधं सर्वनिंदि- एम

८

तं त्रिधावस्थाच देहस्य कामिविंदु भस्मसंस्थिता १८ कोगर्वः क्रियते तात्हर्षो हत्त्वाणाविध्वंसिभिर्नरैः दा
ने विन्ना दत्तं वाचः कीर्त्तिं धर्मौ तथायुषः १९ परोपकारं कायादसारात्सारमुद्धरत् तस्यैवनीयमा
नस्य दूताः संतर्जयंति हि २० दृष्ट्वा यंति भयंतीव्रं नरकाणां पुनः पुनः शीघ्रं प्रचलदुष्टात्मस्त्वया
स्यांति यमालयं २१ कुंभीपाकादि नरकानूत्वां नेष्यामो वयं लघु एवं वाचस्तथाप्याव नू बंध
नां हृदिते तथा २२ उच्चैर्हाहेति विलपन्नूनीयते यमकिंकरैः स्थाने श्राद्धं प्रकुर्वीत अथचैकाद
दशेहनि २३ मृतस्योत्क्रांतिसमयात् षट्पिंडान्क्रमशो ददेत् मृतस्थाने तथा द्वारि चत्वरे
२४ विश्रामे काष्ठचयने तथा संचयने च षट् शृणु तत्कारणं तार्क्ष्य षट्पिंड
ताख्यकारणात् २५ मृतस्थाने शवो नाम तेन नाम्ना प्रदीयते तेन भूमिर्भवेत्तुष्टा तदधिष्ठात्
परिकल्पने २६ द्वारदेशे भवेत्सांथस्तेन नाम्ना प्रदीयते तेन दत्तेन तुष्यंति गृहवास्त्वधि देवताः
देवता २८ चत्वरे खेचरो नाम तमुद्दिश्य प्रदापयेत् न चोपघातं कुर्वंति भूतादि देवयोनयः २८ विश्रा
२७

मेभूतसंज्ञोयंतेनतत्रप्रदापयेत् पिशाचाराक्षसायक्षायेचान्येदिग्निवासिनः २९ तस्यहोतम
८ दहेहं स्वनेवयोग्यत्वकारणं चितामोक्षप्रभृतिकं प्रेतत्वमुपजायते ३० चितायांसाधकंनामव
ह्नस्येकेत्वगेश्वर केचित् तंप्रेतमित्याहूर्येयाकल्पविरक्तया ३१ तदाहितत्रतत्रापिप्रेतनाम
प्रदीयते इत्येवंपंचपिंडेस्तत्रावस्थाहूतियोग्यता ३२ अन्यथाचोपघातायपूर्वोक्तास्तेभ
वंतिहि संमृज्यचोपलिप्याथ उल्लिख्योद्धृत्यवेदिकां ३३ अभ्युक्ष्योपसमाधायवह्निंतत्रवि
धानतः पुष्पाक्षतैश्चसंपूज्यदेवं क्रव्यादसंज्ञितं ३४ त्वंभूतकृज्जगद्योनेत्वंलोकपरिपाल
क उक्तसंहारकस्तस्मादेनंस्वर्गंमितंनय ३५ इतिक्रव्यादमभ्यर्च्यचैतांराहूतिमाचरेत् अ
स्मात्त्वमभिजातोसित्वदयंजायतांपुनः ३६ असौस्वर्गायलोकायस्वाहाज्वलतिपावकः ए
वंमाज्याहूतिंदत्वातिलमिश्रांसमंत्रकां ३७ रोदितव्यंततोगाढंएवंतस्यसुखंभवेत् अर्ध एम
दग्धेतथादेहेदद्याद्राज्याहूतिंततः ३८ दग्धस्यानंतरंतत्रकृत्वासंचयनक्रियां प्रेतपिंडंप्रद ८

घाद्ब दाहार्त्तिशमनं खग ३९ तेन दत्ता प्रतीक्षंते तं प्रेतं बांधवार्थिनं दाहस्यानंतरं कार्यं पुत्रैः स्नानं
सचैलकं ४० तिलोदकं ततो दद्यान्नामगोत्रोपतिष्ठत केचिद्वृक्षेन सिंचंति चिंताख्यानं खगेश्वर ४१
अश्रूपातं न कुर्वीत दत्वा दद्यांजलांजलीन् श्लेष्माश्रु बांधवैर्मुक्तं प्रेतो भुंक्ते यतोवशः ४२ अतोन
रोदितव्यं हि क्रियाः कार्याः स्वशक्तितः दुग्धं च मृन्मये पात्रे तोयं दद्याद्दिनत्रयं ४३ सूर्ये चास्तंगते ता
र्दवलम्मोचत्वरेपि वा बद्धः संमूढहृदयो देहमिच्छन्कृताबुगः ४४ श्मशानं चत्वरं गेहं वीक्षन्
यामेःसनीयते गर्त्ते पिंडो दशाहश्च दातव्यश्च दिने दिने ४५ जलांजलिः प्रदातव्यः प्रेतमुद्दिश्य
प्रत्यहं तावद्धि स्थ कर्त्तमाया वत्पिंडं दद्यादाह्निके ४६ श्मशाने चान्यतीर्थे वा जले पिंडं य दापर्य
येत ओदनामिषसकृना शाकमूलफलादिना ४७ प्रथमेहनि यद्दद्यात्तद्दद्यादुत्तरेहनि। दिना
निदद्यात्पिंडान्सकृत्कुर्वंत्यत्र सुजातयः ४८ प्रत्यहं ते विभज्यंते चतुर्भागैः खगोत्तमः भागद्वयं तु देहा
र्थे प्रीतिदं भूतपंचके ४९ तृतीयं यमदूतानां चतुर्थं चोपजीवति अहोरात्रैस्तु नवभिः प्रेतो निष्प

त्तिमाप्नुयात् ५० जंतोर्निष्पन्नदेहस्य दशमेवलुपतत्क्षुधा नद्विजोनैवमं त्वश्रुनस्वधावाहनाशिषः ५१
९ नाम गोत्रे समुच्चार्य यद्दत्तं तद्दशाह्निकं दशघे हे पुनर्देहमुत्पाद्येवं चकाम्रुपय ५२ प्रथमेहनि यः पिं
डस्तेन मूर्द्धा प्रजायते ग्रीवास्कंधौ द्वितीये च तृतीये हृदयं भवेत् ५३ चतुर्थे च भवेत्पृष्ठिः पंचमे
नाभिरेव च षष्ठे सप्तमके चैव गुह्यमूरुं चाप्यष्टमे तथा ५४ जानुपादौ च नवमे दशमेह्नि क्षुधा
भवेत् देहभूतः क्षुधाविष्टोऽन्हद्वारस्थ तिष्ठति ५५ दशमेहनि यः पिंडस्तं दद्यादामिषेण तु यतो
देहे समुत्पन्ने प्रेतोतीव क्षुधान्वितः ५६ अतस्त्वामिषं बाधंते क्षुधातस्य न नश्यति एकादशे द्वा
दशे च प्रेतो भुंक्ते दिनद्वये ५७ योषितः पुरुषस्यापि प्रेतश्राद्धे समुद्धरेत् दीयमन्नं जलं वस्त्रं अन्य
द्वा दीयते च यत् ५८ प्रेतश्राद्धेन यद्दत्तं तस्यान्नं दद्यायकं त्रयोदशेह्नि संप्रेतो नीयते वै महाप
थि ५९ पिंडजं देहमाश्रित्य दिवारात्रौ बुभुक्षितः शीतोष्णशं कृत्वा दवह्निमार्गस्तुपापिनो राम
६० क्षुधात्तस्माद्दिकं पद्मसोम्यं सर्वं कृतात्मनां मार्गे वै तानि दुःखानि असिपत्रवनान्विते ६१ हसि १०

त्यासादितो नित्यं प्रेतमार्गे प्रयाति च अहन्यहनि वै प्रेतो योजनानां शतद्वयं ६१ चत्वारिंशत्तथा सप्त
अहोरात्रेण गच्छति गृहीतो यमपाशैश्च हाहेति रुदते वनं ६३ स्वगृहं तु परित्यज्य याम्यं पुरमेव व्रजे
त् क्रमेण याति स प्रेतो पुरं याम्यं शुभाशुभं ६४ अतीत्य तानि तान्येवमार्गे पुरवराणि च याम्यं सौरि पु
रं नरेन्द्रभवनं गंधर्वं सिद्धागमं क्रौंचं क्रूरपुरं विचित्रभवनं बह्वापदं दुःखदं नानाक्रोशपुरं सुतप्तभव
नं रौद्रं पयोवर्षणं शीताढ्यं बहुधर्मभीति भवनं याम्यं पुरं चाग्रतः ६५ याम्योदूतैर्दुष्टप्रेतो गृहीतोय
मकिंकरैः तस्मिन्मार्गे व्रजत्येको गृहीत इव मर्कटः ६६ तथैव स व्रजन्मार्गे पुत्रपुत्रेति ब्रुवन्
हाहेति क्रंदते नित्यं कीदृशं तु मया कृतं ६७ मानुष्यं च लभेत्कस्मादिति ब्रूते प्रसर्पति महत्पापु
ण्ययोगेन मानुष्यं जन्म लभ्यते ६८ तस्माद्यन्न प्रदत्तं हि याचकेभ्यः स्वकं धनं पराधीनं तदृ
मेदिति ब्रूते स गरुड ६९ किंकरैः पीड्यते स यथैव स्मरते पूर्व दैहिकं मयान दत्तं हूतं कृतं चानेन तपो व३
न तप्तं हिमशैलगह्वरे न सेवितं गांगमहो महाजलं शरीर हे निस्तर त्वया कृतं ७० जलाश्र न२
यो नैव कृतो निरूढ के मनुष्य हेतोः पशुपक्षिहेतवे गोत्र विप्रहेतोर्न विमुक्तगोचरं शरीर हे निस्तर

२१

११ पत्नयाकृतं ७१ ननित्यदानं नगवाह्निकं कृतं न वेददानं न च शास्त्रदानं पुराणवृक्षा नहि सेविता ध्वाश-
रीरहे निस्तरयत्त्वयाकृतं ७२ मयानभुक्तं पतिसौख्यसंगमं वह्निप्रवेशेन कृतो मृते सति तस्मिन्मृते
त सूतपालनं नहि शरीरहे निस्तरयत्त्वयाकृतं ७३ मासोपवासैर्नविशोधितं वपुश्चान्द्रायणो वा नियमैः
कृतः सुव्रतैः नारीशरीरं बहुदुःखभाजनं लब्धं मयापूर्वकृतैर्विकर्मभिः ७४ उक्तानि वा कानि मया
नराणामतः शृणुष्वात्वहं त्वापिपृच्छन् स्वीयं शरीरं तु विलक्ष्य देही ब्रवीति कर्माणि कृतानि पूर्वं
७५ इति श्रीगारुडपुराणे प्रेतकल्पे पंचमः ५ श्रीभगवानुवाच एवं विलपतस्तस्य प्रेतस्य वरखगे-
श्वर कंदमानः सुदुःखार्त्तः पीडितश्चापि किंकरैः १ सप्तदशदिनान्येको वायुमार्गे प्रकृष्यते अष्टाद-
शाहे ततः प्राणी याम्यपुरं व्रजेत २ तस्मिन्सुरवरे रम्ये प्रेतानां च गणो महान् पुष्पभद्रा नदी तत्र
न्यग्रोधः प्रियदर्शनः ३ पुरे तत्र स विश्रामं संप्राप्यते यमकिंकरैः जायापुत्रादिकं सौख्यं स्मरते
तत्र दुःखितः ४ रोदिति करुणो वाक्यैस्तृषार्त्तः श्रमपीडितः स्वधनं स्वकलत्राणि गृहं पुत्रांस्तु राम
वाणि च ५ भृत्यामित्राणि चान्यच्च सर्वं शोचति वै तदा क्षुधार्त्तस्य पुरे तस्मिन्किंकरैस्तस्य चोच्य ११

ते ६ किंकरानुचुः कृधनं धान्यसुताजायाकिंचान्यकिंचिदीदृशं स्वकर्मोपार्जितं भोक्तास्मृ इया
ताचिरंपथि ७ जानासिशंबलंवृथांबलमध्वगानांनोशंबलायपततसे परलोकपाथः शं
तवमुक्तितवनिश्चितमेतदेवमार्गणा येननमवेक्ष्यविक्रयोपि ८ यमदूतमवंवाक्यानै
वमत्र्यैश्च तंतया एवमुक्तस्ततःसर्वैर्हन्यमानःसमुद्धरैः ९ यदिदत्तसुतैःसर्वैः स्नेहाद्वा -२५
कृपयाथवा मासिकं पिंडमश्नातिततः सौरिपुरंव्रजेत १० तत्रनाम्नातुराजावैजंगमः
कालरूपधृक् तंदृष्ट्वा भयभीतस्तु विश्रामे कुरुतेमतिं ११ यद्दत्तंचान्नसंयुक्तं भुंक्तेत
स्मिन्पुरेगतः त्रिभिःपक्षैस्तथापिंडैस्ततपुरंसव्यतिक्रमेत १२ नोंइनगरेरम्यप्रेतोयाति
दिवानिशं वनानितत्ररौद्राणिदृष्ट्वाक्रंदतिभीषणं १३ भीषणैः क्लिश्यमानस्तुरुद
द्वि२ तेषुपुनःपुनः मासेयावसाने तुततपुरंसव्यतिक्रमेत १४ भुक्त्वाचान्नंजलंवस्त्
रंपदां दत्तंपदाधवैरिह क्लिश्यमानस्तथापारोनीयतेयमकिंकरैः १५ तमो

१२ येमासिसंप्राप्ते गंधर्वनगरे शुभे तृतीयमासिकं दत्तं तत्र भुंक्ते स गच्छति १६ शैलागमं च तुर्ये तु मासे चै
व खगेश्वर पाषाणास्तत्र वर्षंति प्रेतस्योपरि सत्वरं १७ चतुर्थं मासिकं श्राद्धं भुक्त्वा तत्र सुखी भवेत् त
तो गच्छति स प्रेतः क्रूरं मासे तु पंचमे १८ इह दत्तं तत्र यो भुंक्ते प्रेतस्तारसस्थितः न्यूनषाण्मासिके क्रौंचे पं
चभिः सार्धमासिकैः १९ तत्र दत्तेन पिंडेन श्राद्धेनाप्यायितः पुरे मुहूर्तं तु विश्रम्य कंपमानः सुदुःखितः
२० तत्पुरं स परित्यज्य तर्जितो यमकिंकरैः प्रयाति चित्रनगरं विचित्रो नाम पार्थिवः २१ यमस्य
वानुजः सौरिर्यत्र राज्यं प्रशास्ति हि तत्र षाण्मासपिंडेन तृप्तः स हभ्यते नरैः २२ मार्गे पुनः पुनः
स्तस्य बुभुक्षा पीडयत्यलं तिष्ठते कोपि मदीयः सुकृती सुत बांधवः २३ दुःखं मे यो न जानाति प
तितः शोकसागरे एवं विलपते मार्गे वार्यमाणस्तु किंकरैः २४ आयांति संमुखास्तत्र कैवर्ता
स्तु सहस्रशः वयं नेतुं तु कामाय महावैतरणी नदी २५ शतयोजनविस्तीर्णा पूयशोणितक
र्दमा नानासत्त्वसमाकीर्णा नानापक्षिसमावृता २६ तत्र येन प्रदत्ता गौस्तदा नावं प्रसर्पति एम
मात्रेणाहितं दानं मंते वैतरणी नदी २७ दत्तापापं हरेत्सर्वं विष्णुलोकं च सानयेत् नदत्ताचेत्तव २८

गाङ्करीं प्राप्य दुःखार्त्तो मज्जति २८ स्वल्पाब्धिवच्छरीरे च वैतरणीपारतं च रेत देयाच विदुषे धेनुस्तां न हि
तर्तुमिच्छति २९ अदत्ते मज्जमानस्तु निहत्यात्मानमात्मना याष्टे यार्थं मया किंचिन्न प्रदत्तं द्विजातये
३० न दत्तं न हुतं जप्तं स्नातं न श्रितं तपः याद्दृशं कर्म चाचीर्णं मूढ भोक्ष्यसे तत्तादृशं ३१ हा दैव इति संमूढो
भीवतोऽस्ताप्युते हृदि वैतरणीपाः परतटे भुङ्क्ते दत्तं घटाह्निकं ३२ षण्मासिकं च पश्चार्द्धं तत्र भुक्त्वाऽप्र
सर्पति तार्क्ष्य तत्र विशेषेणाभोजये ब्राह्मणान्नृभान ३३ चत्वारिंशान्तथा सप्तयोजनानि निश्चात
हृष्टं प्रयाति प्रसहतान्त्यीग्रहो रात्रेण कर्षितः ३४ सप्तमे मासि संप्राप्ते पुरं बह्वापदं व्रजेत् तत्र
भुक्त्वा प्रदत्तं यत्तत्सप्तमासिकसंभवं ३५ तस्मिन्पुरे स्यात्तिक्रम्य दुःखदं पुरमाश्रयेत् महादुःखमनु
प्राप्य तन्मार्गगश्च तेपुनः ३६ नानाक्रन्दगणान् दृष्ट्वा क्रन्दमानानसुदारुणान् स्वयं च भृत्य हृ
हृयः समाक्रन्दति दुःखितः ३७ विहाय तत्पुरं प्रेतो याति तत्तत्पुरं प्रति कुलसन्नगरं प्राप्य दृष्ट्वा मेमा
सिसो श्नते ३८ भोजनैः पिण्डदानैश्च दत्तैस्तत्र स्त्रवि भवेत मासि चैकादशे पुरो रौद्रं स्थानं स गच्छति
३९ दृष्टोकमासिकं भुक्त्वा पयोवर्षा निष्क्रान्ति मेघा तत्र प्रवर्षति प्रेतानां दुःखदायकाः ४० सूना
हृकं च यस्मात्तत्र भुङ्क्ते स दुःखितः संपूर्णेऽनवर्षे वै प्रेतः शीत पुरं व्रजेत ४१ शीतार्द्धं नगरं त

न्नमहाशीतंपतत्यपि शीतार्त्तः क्षुधितः सोथवीक्षते हि दिशो दश ४२ तिष्ठते बांधवः कोपियोमे दुःखं
१२ व्यपोहति किंकरास्तं वदंत्येवं कृते पुण्ये हि तादृशं ४३ श्रुत्वा तेषां च तद्वाक्यं हा दैव इति भाषते दै
वं यत्पूर्वं सुकृतं न मया पूर्वं संचितं ४४ एवं संचिंत्य बहुशो धैर्यमालंबते पुनः चत्वारिंशद्योजना
नि चहर्युक्तानि वै ततः ४५ धर्मराजपुरं रम्यं गंधर्वाप्सरसाकुलं चतुराशीतिलक्षैश्च मर्त्त्यमूर्त्तैरधि
ष्ठितं ४६ त्रयोदशप्रतीहारा धर्मराजपुरे स्थिताः शुभाशुभं तु यत्कर्म ते विचार्य पुनः पुनः ४७
13 श्रवणा ब्रह्मणः पुत्रा मानुषाणां हि चेष्टितं कथयंति तदा लोके पूजिताः पूजिताः स्वयं ४८ नरे
ष्टेश्च दृष्टेश्च ततस्तोत्तं सुकृतं च यत् सर्वं निवेदयंति स्म चित्रगुप्ताय वै तदा ४९ दूराच्छ्रवणा
विज्ञानं दूराद्दर्शनगोचरं एवमैश्वर्यमस्त्येते घष्टौ स्वर्भूपातालचारिणः ५० व्रतैर्दानैश्च यत्नेषां
पूजयेद्यस्तु मानवः जायंते तस्य ते सौम्याः सुखमृत्युप्रदायिनः ५१ इति श्रीगरुडपुराणे प्रे
तकल्पे षष्ठोध्यायः ६ श्रीभगवानुवाच अथ वक्ष्यामि संक्षेपाद्यममार्गस्य निष्कृतिं वर्षोत्स रम
र्गस्य पुण्येन पितृलोकं स गच्छति १ एकादशाहपिंडेन शुद्धदेहो भवेत्तु सः उदकुंभप्रदानेन किंक १२

रास्तृप्तिमाप्नुयुः २ शय्यादानैर्विमानस्थो याति मार्गे खगेश्वर तदङ्घ्रि दीयते सर्वं वस्त्राद्याहे विशेषतः
३ पदानि सर्ववस्तूनि वशिष्टानि त्रयोदश यो ददाति मृतस्येह जीवन्वाप्यात्महेतवे ४ शय्यापिते
महामार्गे विनतेयमसमगच्छति एकएवास्थितु सर्वत्र व्यवहारः खगेश्वर ५ उत्तमाधममध्यानां तत्तद्दावज
नं भवेत् यावद्वासं भवेद्यस्य तावन्मार्गो निरिच्यते ६ स्वयं स्वहस्तेन पद्दत्तं सुखी तत्र करोति तं मृते
यद्बांधवैर्दत्तं तदाश्रित्य सुखी भवेत् ७ गरुड उवाच कस्मात्पदानि देयानि किंविधानि त्रयोदश दीय
ते कस्य देशात तद्वद स्वयथातथं ८ भगवानुवाच छत्रोपानहवस्त्राणि मुद्रिका च कमंडलुं आस
वे ६ नं भाजनं चैव पदं सप्तविधं स्मृतं ९ आतपस्तत्र रौद्रो यो दह्यते येन मानवः छत्रदानेन तच्छायाजा
यते प्रेत तुष्टिदा १० असिपत्रवनं घोरं सोतिक्रामति वै सुखं अश्वारूढाश्च ते यांति ददते मे त्युपा
नहौ ११ बहुघर्मसमाकीर्णे निवासे तोयवर्जिते कुमंडलुप्रदानेन सुखी भवति निश्चितं १२ आ
सने भाजने चैव दत्ते सम्यक्द्विजातये सुखेन भुंजते प्रेतः पथि गच्छन् शनैः शनैः १३ मृतोद्दे
नयो दद्यादुदयात्रं तु ताम्रजं प्रपालोकसहस्रस्य तत्फलं सोश्नुते ध्रुवं १४ यमदूता महारौद्राः

करालाः कृष्णपिंगलाः नपीडयंति यस्तस्याः दत्त्वाभरणदानतः १५ सोप्युधावध्यमानास्तेन मार्गे दृष्टि
१४ गोचरे प्रयाति यमहर्म्यस्थाने मुद्रिकायाः प्रदानतः १६ भाजनासनदानेन आमान्नभोजनेन च आज्य
पत्रोपवीतेन पदसंपूर्णतो व्रजेत् १७ एवं मार्गे गच्छमानस्तृषार्त्तः श्रमपीडितः माहिषीरथगोदाना
त्सुखी भवति निश्चितं १८ गरुड उवाच मृतोद्देशेन यत्किंचिद्दीयते स्वगृहे विभो सगच्छति महामार्गे तद्द
14 त्तं केन गृह्यते १९ श्रीभगवानुवाच गृह्णाति वरुणो दानं ममहस्ते प्रयच्छति अहं च भास्करे देवे
भास्करात्सोश्नुते फलं २० विकर्मणः प्रभावेन वंशच्छेदः स्थिताविह सर्वे ते नरकं यांति यावत्पापस्य
संक्षयः २१ कस्मिंश्चित्समये पूर्णो महिषासनसंस्थितः नरकान्वीक्ष्य धर्मात्मा नानाकंदसमा
कुलान् २२ चतुराशीतिलक्षाणां नरकाणां सहस्रशः तेषां मध्ये श्रेष्ठतमा घोरेया ह्येकविंशति
: २३ तामिश्रं लोहशंकुं च महाभैरवशाल्मली रौरवं कुड्मलं पूतिमृत्तकं कालसूत्रकं २४ सं
घातं लोहतोदं च सविषं संप्रतापनं महानरककाकोलं संजीवनमहापथं २५ अवीचिमंधता
मिस्रं कुंभीपाकं तथैव च असिपत्रवनं चैव पतनं चैकविंशति २६ येषां तु नरके घोरे बहून्यब्द
गतानि वै संततिर्नैव वा वंशो नदूतत्वे ते प्रयांति च २७ यमेन प्रेषितास्ते वै मानुषस्य गृहस्थवै दिने एम १४

द्दिनेऽप्रगच्छति दत्तमन्नं घटादिकं २७ प्रेतस्यैव प्रयच्छंति सन्नवामावुधस्थिताः मासांते भोजनं पिंडमे
कं यच्छंति तत्र वै २९ तृप्तिं प्रयांति ते सर्वे प्रत्यहं वै वत्सरं एवमादिकृतैः पुत्राद्यैः क्रमतो वत्सरे व्रजे
त् ३० ततः संवत्सरस्यांते प्रत्यासन्ने यमालये बहुभीतिकरे प्रेतो हस्तमात्रं सङत्सृजे त् ३१ दशाभि
र्दिवसैर्जातं तं देहं दशपिंडजं जामदग्न्यं यथा रामं दृष्ट्वा नेजः प्रसपति ३२ कर्मजं देहमाश्रित्य
पूर्वदेहं समुत्सृजेत् अंगुष्ठमात्रो वायुश्च समिपत्रे समारुहेत् ३३ व्रजेत्क्षितिं छन्य दैकेन यथैवके
नगच्छति यथा तृणजलौकेव देही कर्मानुगो वशः ३४ वासांसि जीर्णानि यथा विहाय नवा
नि गृह्णाति नरोऽपराणि तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ३५ इति श्री
गरुडपुराणे प्रेतकल्पे सप्तमः ७ श्रीभगवानुवाच वायुभूतः क्षुधाविष्टः कर्मजं देहमाश्र
येत् तं देहं समासाद्य यमेन सह गच्छति १ चित्रगुप्तपुरे तत्र योजनानां तु विंशतिः कायस्थं
तत्र पश्यंति पापाः पुण्याश्च सर्वशः २ महादानेषु दत्तेषु गतस्तत्र सुखी भवेत् योजनानि च
त्वारिंशत्तु देवैवस्वतं शुभं ३ लोहं लवणकार्पासं तिलपात्रं च यैः कृतं तेन दत्तेन नात्प्यांति य
मस्य पुरश्चारिणः ४ गत्वा तत्र तु ते सर्वे प्रतिहारं वदंति हि धर्मध्वजः प्रतीहारस्तत्र तिष्ठति

सर्वदा ५ व्रीहयो यवगोधूमा मुद्गमाषाः प्रियंगवः गे तिलाश्च सप्तमाः प्रोक्ताः सप्तधान्यमुदाहृतं
१५ ६ सप्तधान्यस्य दानेन प्रीतो धर्मध्वजो भवेत् तत्र गत्वा प्रतीहारो ब्रूते तस्य शुभाशुभं ७ धर्म
ति२ राजस्य यद्रूपं संतः सुकृतो जनाः पश्यंति चतुरात्मानो यमरूपं सुभीषणं ८ तं दृष्ट्वा भयभी
तस्तु हाहेति रुदते पुनः कृतं दानं तु यैर्मर्त्यैस्तेषां नास्ति भयं क्वचित् ९ प्राप्तं सुकृतिनं दृष्ट्वा
स्थानाच्चलति सूर्यजः एष मे मंडलं भित्वा ब्रह्मलोकं प्रयातु भोः १० दानेन सुलभो धर्मो यम
15 मार्गसुखावहः एष मार्गो विना दानैर्न केनाप्यनुगम्यते ११ दानैः पुण्यैर्विना वत्स न गच्छेद्धर्म —
मंदिरं यस्मिन्मार्गे ति रौद्रास्तु भीषणा यमकिंकराः १२ पाशदंडधरा घोराः महत्त्वाग्नित्रयो
दश एकैकस्य पुरस्याग्रे क्रूरा रौद्रास्तु विकृताननाः १३ पापिनं प्राप्य याचंते उत्कोचं यम
किंकराः महंति मासमासांते पदं द्वौ यं तद्यद्भवेत् १४ ऊर्ध्वदेहिकदानानि यैर्न दत्तानि का
श्यप महाकष्टेन ते यांति तस्माद्दद्यानि शक्तितः १५ अदत्वा पश्यु वधाति गृहीतो बधबंध
नैः एवं कृतेव तं पश्येत्स नरः कृतकर्मणा १६ दैवकी पैतृकी योनिर्मानुषी वा यनारकी धर्म राम
१५

राजस्यवचनान्मुक्तिर्भवतिनान्यथा १७ मानुषत्वंततःप्राप्यसुकुलेप्रव्रजेत् यथाहातंकर्मयेन
सतोयोनिंव्रजेन्नरः १८ तत्तथैवचभुंजानोविचरेत्सर्वलोकतः अशाश्वतंपरिज्ञायसर्वलोकमवसुखं
१९ यदाभवतिमानुष्यत्वंतदाधर्मंसमाचरेत् कृमयोभस्मविष्ठावादेहिनांप्रकृतिःसदा २० अंधकूपे
महारौद्रेदीर्घहस्तःपतत्स्वपि महत्पुण्यप्रभावेनमानुष्यंजन्मलभ्यते २१ यस्तंप्राप्यचरेद्धर्मंसगच्छे
संरमोगतिं अविज्ञानन्नरस्तांधर्मंदुःखमायातियातिच २२ जातीशतेषुलभतेकिलमानुषत्वंत
त्रापिदुर्लभतरंखलुभोद्विजत्वं यस्तन्नपालयतिलालयतीन्द्रियाणि तस्यामृतंक्षरतिहस्तगतंप्र
माहात् २३ इतिश्रीगरुडपुराणेप्रेतकल्पेष्टमः ८ गरुड उवाच येकेचित्प्रेतरूपेणकुत्रवासंल
भंतिते प्रेतलोकाद्विनिर्मुक्ताः कथंभोगायमुक्तिदे १ चतुराशीतिलक्षेषु नरकैःपर्युपासिताः यमे
नरक्षितास्तत्रदूतैश्चैवसहस्रशः २ विचरंतिकथंलोकेनरकाद्विविनिर्गताः रक्षितारक्षपालैश्च
विचरंतिदिवानिशं ३ श्रीभगवानुवाच पक्षिनाथशृणुष्वत्वंयत्रप्रेताश्चरंतिवै परार्थंदारुणाहार
रणान्छलाद्वोमाग्निशाचराः तथैवपापकर्त्तारः आत्मजान्वेषणेरताः ४ विचरंत्यशरीरास्तेहृत्पि

१६ पासादिंत्तामन्शं बंदिग्रहणान्निर्मुक्तायेम्योनश्यंतिजंतवः ५ तेच्यवसंतिवैप्रेताबधोपापंचजंतुषु पि
तृक्षाराणि रुधंतिमार्गो द्वेगकराश्चया ६ पितृभर्णाव्विगर्हितितस्करा इवपांथकान् स्ववेश्मपुनरा
गम्यपुत्रक्षेदेववगाधिप ७ तत्रस्थितानिरीक्षंतेरोगशोकादिबंधने ज्वररूपेणपीड्यंतेद्येकांतरमि
षेणतु ८ ततोपरस्तुज्वरोभूत्वाशीतवातादिपीडितः अन्यांश्चविविधान्रोगान्शिरोर्त्तिंचविषूचि
का ९ चिंतयंतिसदातेषांछिद्रादिस्थलस्थिताः आत्मजापाछलाल्लोभाद्भूतवातैश्चराक्ष
ताः १० पिबंतितत्रपानीयंभोजनोच्छिष्टसंभवं एवंप्रेताःप्रवर्तंतेनानादोषैर्विकर्मिणः ११ ग
रुडउवाच कथंकुर्वंतितेप्रेताःकेनरूपेणकस्यचित् जायंतेकेनविधिनातिष्ठंतिचवदंतिकिं १२
एतंछिंधिमनोमोहं ममचेदस्तिसुप्रियं कलिकालेहृषीकेशप्रेतत्वंजायतेबहु १३ भगवानुवा
च स्वकुलेपीडयेत्प्रेतःपरछिद्रेणपीडयेत् जीवितेहरपतेस्नेहोमृतोदुष्टत्वमाप्नुयात् १४ तद्जा
पीधर्मरतोदेवतातिथिपूजकः सत्यवाक्प्रियवादीचनसप्रेतैश्चपीड्यते १५ गायत्रीजाप्यनिरतो राम
वैष्णवदेवक्रियापरः श्राद्धकृत्तीर्थसेवीचनसप्रेतैश्चपीड्यते १६ सर्वक्रियापरिभ्रष्टोनास्तिकोवेदनिंदकः १६

16

असत्यवाक् कुव्यसनो नरः प्रेतैश्च पीड्यते १७ कोलोप्रेतत्वमाप्नोति ताड्यो शुद्धक्रियापरः कृतादौ
द्वापरान्ते च न प्रेतो नैव पीडनं १८ बहूनामेकजातानामेकः सोत्यंसमश्नुते एको दुःकृतकर्मा च एकः
अ३ संततिवान् भवेत् १९ एकः संपीड्यते प्रेतैरेकोधर्मसमन्वितः एकस्य पुत्रनाशः स्यादेको दुहितवा
न् भवेत् २० विरोधो बंधुभिः सार्द्धं प्रेतदोषात्त्विमे खग संततिर्दृश्यते नैव समुत्पन्ना विनश्यति
२१ पशुद्रव्यविनाशश्च सा पीडा प्रेतसंभवा प्रकृतेश्च विपर्यासो विद्वेषः सह बंधुभिः अकस्माद्व्यस
नप्राप्तिः सा पिडा प्रेतसंभवा २२ पितृमातृगुरून् हंता देवतातिथिनिंदकः नास्तिक्यं व्रतलोपश्च
महालोभस्तथैव च दंभश्चदंतकलहः सा पीडा प्रेतसंभवा २३ नीत्यकर्मविनिर्मुक्तो जपहोमवि
वर्जितः हर्त्ता च परद्रव्याणां सा पीडा प्रेतसंभवा २४ सुभिक्षे कृषिनाशश्च व्यवहारो विनश्यति
लोके कलहकारी च सा पीडा प्रेतसंभवा २५ मार्गे च गच्छमानाच पीड्यते वातमंडली तत्र संपी
ड्यते प्रेतैरिति सत्यं वचो मम २६ हीनजात्या च संबंधो हीनकर्म करोति च अधर्मे रमते चि
त्तं सा पीडा प्रेतसंभवा २७ व्यसनाद्द्रव्यनाशः स्यादुपार्ज्जितं विनश्यति चौराग्निराजतो हा
निः सा पीडा प्रेतसंभवा २८ महारोगोपपत्तिश्च स्वतनोः पीडनं च यत् जायासंपीड्यते पत्न सा

१७ पीडाप्रेतसंभवा २९ देवतीर्थे द्विजातीनां प्रत्ययो नैव दृश्यते प्रत्यक्षं वा परोक्षं वा दूषयेत्प्रेतभावतः ३०
17 गृहे दत्तकाले च श्चैव भोजने कोपसंयुतः परद्रोहमतिश्चैव सापीडाप्रेतसंभवा ३१ भावशुद्ध्यानकुरू
ते श्राद्धं सांवत्सरादिकं स्वयमेव न कुर्वीत सापीडाप्रेतसंभवा ३२ तीर्थं गत्वा परासक्तः स्वकृत्यं तु
परित्यजेत् धर्मकामेषु संपत्तिः सापीडाप्रेतसंभवा ३३ स्वयंतिहरणं पश्यत्र सशायो भिजायते
वंशच्छेदः प्रदृश्येत सापीडाप्रेतसंभवा ३४ स्त्रीणां गर्भविनाशः स्यान्न पुष्पं दृश्यते क्वचित्
बालानां मरणं यत्र सापीडाप्रेतसंभवा ३५ पित्रौ वा कनकुलेषु पत्नी नैव सेवते सदा क्रू
रमतिर्व्यसनः सापीडाप्रेतसंभवा ३६ वियोगो जायते चित्ते सदोद्वाटकरेन्नरणां स्वकृत्ये निष्फलं
तिजः सापीडाप्रेतसंभवा ३७ विकर्मी जायते प्रेतो ह्यविधिक्रियया तथा तत्काल दुष्टसंसर्गी
द्विदुःगेसबेम्मनेनया ३८ दुष्टमृत्युवशात्क्वापि प्रदुष्टवस्तुयस्तथा प्रेतत्वं जायते तान्नर्थपीड्यन्ते
येनजंगवः ३९ एवं ज्ञात्वा एवगश्रेष्ठ प्रेतमुक्तिं समाचरेत् यो वै न मन्यते प्रेतं मृतः प्रेतत्वमाप्नुया
त् ४० प्रेतदोषाकुले यत्र सुखं तत्र न विद्यते मतिः प्रीतिर्धृतिर्बुद्धिर्लक्ष्मीस्तत्र न तिष्ठति ४१
तृतीये पंचमे वापि वंशच्छेदो भिजायते दारिद्र्यो निर्धनश्चैव पापकर्मा भवे भवे ४२ व्याधि राम
१७

तो दुःखितश्चैव मंदभाग्योभिजायते तस्मात्सर्वप्रयत्नेन प्रेतमुक्तिं समाचरेत् ४३ येकेचित्प्रेत
रूपा विकृतमुखदृशो रौद्रदंष्ट्राकराला मन्यंते नैव गोत्रं सुतदुहितृपितॄन्भ्रातृजायां च बंधून्
कृत्वा चान्यूरूपं ह्युग्रगतिरहिता भावमाना यथेष्टं हा कष्टं भो हुकामा विधिवशपतिताः संस
रंति स्वपाके ४४ इति श्रीगरुडपुराणे प्रेतपीडाख्यानम्ः ~ गरुड उवाच एतैश्च लक्षणैर्देव
पीडा प्रेतभवा यदा तदा तेषां भवेन्मुक्तिः प्रेतत्वेन कथं भवेत् १ प्रेतत्वं किं प्रमाणं च कति वर्षा
णि संख्यया चिरं प्रेतत्वमाप्नोति स कथं मुक्तिमाप्नुयात् २ श्रीभगवानुवाच मुक्तिं प्रयांति ते प्रे
तास्तद्वक्ष्ये कथयामि ते यदैवं मत्यो मर्त्यो मम पीडाकृतस्त्विपं ३ एवार्थे च तमिछंतो गुणान्वे
विनिवेदयेत् स्वप्ने दृष्टः शुभो वृत्तः फलितश्चूतचंपकः ४ विप्रो वा वृषभो देवो भ्रमते
तीर्थगो यदि एवं दृष्ट्वा यथा स्वप्ने मृतः कोपि स्वगोत्रजः ५ स प्रेतत्वं परित्याय दृष्ट्वा प्रे
तभावतः अद्भुतानि प्रदृश्यंते प्रेतदोषाद्विनिश्चितं ६ तीर्थस्नानेन मतिर्यावद्यावद्वि
त्तैपरायणं धर्मोपायं प्रकुर्वन्ने प्रेतपीडा तदा हरेत् ७ तदा तत्तान्नाशाय चित्तभंगक

१८ रोतिच श्रेयांसि बहुविघ्नानि भवंतिच पदेपदे ८ अश्रेयसि प्रवर्त्तंते चश्रेयंति पुनःपुनः उच्चाट
नंचक्रूरत्वं सर्वं प्रेतकृतं खग ९ सर्वविघ्नानि संत्यज्य मत्पापं करोतियः तस्य कर्मफलं साधु प्रेत
त्वमिति च शाश्वती १० न भवेत्तत्र भक्तिश्च दत्तं श्रेयस्करं परं स्वयं तत्प्यति भोक्ता च यस्या दृश्यते न दी
यते ११ शृणु सत्यमिदं तार्क्ष्य यो ददाति स भुंजति आत्मैव श्रेयसे भुंज्यात्प्रेतस्तत्पीडितं व्रजे द्विज
१२ ते प्रेताः शुभमिहंति आत्मबंधुषु सर्वदा अन्यानपि दुरात्मानः क्लेशयंति स्ववंशजान् १३
निवारयंति तस्मात्ते जायमानानुपद्रवान् पश्चात्ते मुक्तिमायांति काले प्राप्ते सुपुत्रतः १४
सदा बंधुषु पश्यंति वह्निस्फुलिंगं खगाधिप दर्शनाद्भाषणाद्धस्तचेष्टनात्पीडनाकृतिं १५ नश्रा
पपति मूढात्मा प्रेतपापैः सलिप्यते अपुत्रको महादुःखी दरिद्री व्याधितस्तथा १६ वर्त्तिही
नश्च दीनश्च भवेज्जन्मनि जन्मनि एवं ब्रुवंति ते प्रेताः पुनर्योनिं समाश्रयेत् १७ तत्रस्थानां
भवेन्मुक्तिः स्वकाले कर्मसंक्षये गरुड उवाच नामगोत्रं न दृश्येत प्रतीतिर्नैव जायते कि
चिद्दहंति तिष्ठंता पीडां प्रेतसमुद्भवां नत्वप्रंचेष्टितं नैव दर्शनं न कदाचन १९ किंकर्त्तव्यं सुर राम

१८

18

श्रेष्ठं तन्ममे ब्रूहि निश्चयं श्रीभगवानुवाच श्रुतं वाप्यनृतं वापि वदंति त्विति देवताः २० तन्मनसो चित्त
त२ • हृदये सत्यमेतद्धि जोरितं भावभक्तिपुरस्कारं द्विजभक्तिपरायणाः २१ कृत्वा कुसुमबलिं चैव पुरश्च
रणापूर्वकं जपहोमैस्तथा दानैः प्रकुर्याद्देहशोधनं २२ कृतेन तेन विघ्नानि विनश्यंति खगे
श्वर भूतप्रेतपिशाचाद्यैर्न कदापि प्रपीड्यते २३ पितृदेशेन वै कुर्यान्नारायणबलिं ततः विमु
क्तः सर्वपीडाभ्य इति सत्यं वचो मम २४ पितृपीडा भवेन्नात्र कृत्यैरन्यैर्विमुच्यते तस्मात्सर्वप्र
यत्नेन पितृभक्तिपरो भव २५ नवमे दशमे वर्षे पितृदेशेन यः पुमान् गायत्र्या अयुजं साहस्रं त६
शेन च होमयेत २६ कृत्वा कुसुमबलिं चैव वृषोत्सर्गादिकाः क्रियाः सर्वापद्विहीनस्तु सर्व
सौख्यमवाप्नुयात् २७ उत्तमं लोकमाप्नोति ज्ञातिप्राधान्यमेव च पितृमातृसमं लोकेना
स्त्यस्मद्दैवतं परं २७ तस्मात्सर्वप्रयत्नेन पूजयेद्धै पितॄन्गुरून् हितानामुपदेष्टा हि प्रत्यक्षं दे
वतं पिता २९ अन्याश्च देवता लोके ताश्च देहस्य भावना शरीरमेकजं तन्नो नियतस्वर्गमोक्षदं ३०
देहो हन्तो हि येनैव कोन्यः पूज्यतमस्ततः इति संचित्य हृदये पितरं यः प्रपश्यति ३१ तत्सर्वमा

१९ त्मनोभोक्तादानंवेदविदेविदुः पुंनाम्नोन[illegible]रकाद्यस्मात्पितरंत्रायतेसुतः ३४ तस्मात्पुत्रइतिप्रो
क्तःइहचापिपरत्रच अपमत्सुवशांस्यातांपितरौपत्यकस्यचित् धर्मतीर्थविवाहादिश्राद्धसं
वत्सरंसजेत् ३३ इतिश्रीगरुडपुराणेप्रेतकल्पेदशमोध्यायः १० गरुडउवाच संभवंति
कथंप्रेताकेनस्याद्वतरीगतिः कीदृक्तेषांभवेद्रूपंभोजनंकिंचवैभवेत् १ सुप्रीतास्तेक
थंप्रेताःक्वतिष्ठंतिसुरेश्वर प्रसादंकुरुदेवेशप्रश्नमेनेवदस्वमे २ श्रीभगवानुवाच पाप
19 कर्मरतायेचपूर्वकर्मवशानुगाः जायंतेतेमृताःप्रेतास्तान्मृणुष्ववदाम्यहं ३ वापी
कूपतडागांश्चआरामःसुरमंदिरं प्रपासद्मसुचित्रंचतथाभोजनशालिकाः ४ पितृपैता
महंधर्मंविक्रिणातिसपापकृत् मृतःप्रेतत्वमाप्नोतियावदाभूतसंप्लवं ५ गोचरंग्रा
मसीमाचतडागारामगह्वरं कर्षयंतिचयेलोभात्प्रेतास्तेसंभवंतिहि ६ चंडालादुदका
त्सर्पाद्ब्राह्मणाद्वै[illegible]ताद्पि दंष्ट्रिभ्यश्चपशुभ्यश्चमरणंपापकर्मणां ७ उद्बंधनमृतायेचवि राम
१९

धु १

पशात्त्र हताश्चये आत्मोपघातिनोपेच विषव्यादिमृतास्तथा ८ महारोगैर्मृतायेच पापरोगैश्च दस्युभिः
असंस्कृतप्रणीताश्च सदाचारविवर्जिताः ९ वृषोत्सर्गादिसंस्कारलुप्ताः पिंडैश्च मासिकैः यस्या
नयति भूः शोभिनं तृणकाष्ठहवींषिच १० पतनेपर्वतानांच भित्तिपातेच येमृताः रजस्वलादि दोषेश्च
नभूमौ म्रियते यदि ११ अंतरिक्षे मृतायेच विष्णुस्मरणवर्जिताः सूतकादिकसंपर्कैः प्रेतभावादु
मेहितो १२ एवमादिभिरन्यैश्च कुमृत्युवशगाश्चये तेसर्वे प्रेतयोनिस्थाविचरंतिनराः स्थले
१३ मातरं वा दुहितरं कलत्रं वा स्नुषामपि अदृष्टदोषांत्यजति सप्रेतोजायते ध्रुवं १४ मतरं ध्रु
कृतघ्नः ब्रह्महागोघ्नः सुरापो गुरुतल्पगः हेमहर्त्तीच भूमिर्यः सप्रेतत्वमाप्नुयात् १५ कुलमार्गां
श्च संत्यज्य ह्यन्यमार्गेरतः सदा पश्चविद्याविहीनश्च सप्रेतोजायते खग १६ अत्रैवोदाहरंती
ममितिहासंपुरातनं युधिष्ठिरस्य संवादं भीष्मेणसह सुव्रत १७ तमहं कथयिष्यामि श्रुत्वा
सोत्वमवाप्नुहि युधिष्ठिर उवाच केनकर्मविपाकेन प्रेतत्वमुपजायते केनवामुच्यतेतस्मात्त
न्मे ब्रूहि पितामह १८ भीष्म उवाच अहंतेकथयिष्यामि सर्वमेतदशेषतः यच्छ्रुत्वानपुनर्मो

१०

हमेवंयास्मासिस्तुव्रत १९ येनैवजायतेजंतुर्येनवापिसमुच्यते प्राप्नोतिनरकंघोरंदुस्तरंदेव
तैरपि २१ सततंश्रवणाघस्यपुराणपतीर्थानुकीर्तनात् मानवाविप्रमुच्यंतेस्यापन्नाःप्रेतयोनिषु
श्रूयतेहिपुरावत्सब्राह्मणःशंसितव्रतः २१ सुतपानामविख्यातस्तपोर्थेवनमाश्रितः स्वा
ध्यायहोमसंयुक्तःसदाचारोजितेंद्रियः २२ यजतेसकलान्यज्ञान्युक्तयाकालेविपेत्सदा श्र
द्धयाचयुक्तःसदापुत्रोयुक्तात्सतपसिमादृवे २३ परलोकभयेयुक्तःसत्यशौचपरायणः युक्तोगुरु
णांवाक्येतुयुक्तश्चातिथिपूजने २४ विद्वांश्चात्मयोगेषुसर्वद्वंद्वविवर्जितः योगाभ्यासे
सदायुक्तःसंसारविजिगीषया २५ एवंव्रतःसदाचारोमोहकोहोजितेंद्रियः बहून्यष्टानि
चवनेतस्मिन्जातानितस्यवै २६ मुनेर्बुद्धिस्ततोजातातानार्थतीर्थाटनंप्रति पुरोपत्तीर्थज
लेरेतच्छोषयिष्येकलेवरं २७ सतीर्थेत्वरितंस्नात्वाभास्करस्योदयंप्रति कृतजाप्यनमस्का
रःसोध्वानंप्रतिपद्यत २८ एकस्मिन्दिवसेविप्रोमार्गभ्रष्टोभवत्तदा त्वरितोपिवनेऽपश्य
त्संचप्रेतान्सुभीषणान् २९ अरण्येनिर्जलेदेशेकंटकीवृक्षसंकुले पंचतान्विकृताका राम

१०

20

रान्दृष्ट्वावैघोरदर्शनान् ३० ईषत्संत्रस्तहृदयस्तिष्ठन्मीलितलोचनः अवलंब्यततोधैर्यंत्रास
मुत्सृज्यदूरतः ३१ पप्रच्छमधुराभाषीकेयूयंविकृताननाः किंवाऽशुभंकृतंकर्मयेनप्राप्ताःस्ववै
कृतिं ३२ कथंवाप्यकृताःकर्मप्रस्थिताःकुत्रनिश्चितं प्रेताऊचुः॥ स्वैस्वैःस्वकर्मभिःप्राप्तंप्रे
तत्वंहिद्विजोत्तम ३३ परद्रोहरताःसर्वेनष्टसंज्ञाविचेतसः नजानीमोदिशंतातनविदिशंवाति
दुःखिताः ३४ क्वनुगच्छाममभोमूढाःपिशाचाःकर्मजावयं नमातानपितास्माकंप्रेतत्वंकर्मभिः
स्वकैः ३५ प्राप्ताःस्मसहसाविप्रदुःखोद्वेगसमाकुलाः दर्शनेनचतेविप्रह्लादिताव्यापितावयं
३६ मुहूर्त्तंतिष्ठवक्ष्यामोवृत्तांतंसर्वमादितः अहंपर्युषितोनामएषसूचिमुखःस्मृतः ३७ शी
घ्रगोरोधकश्चैवपंचमोलेखकस्तथा ब्राह्मणउवाच प्रेतानांकर्मजातीनांकथंनामानिचसंभ
वः किंतत्कारणमुद्दिश्ययतोयंनामनिर्णयः ३८ प्रेतराजऊचुः मयास्वादुसदाभुक्तंदत्तंपर्युषि
तंद्विजे एतत्कारणमुद्दिश्यनाम्नापर्युषितस्त्वहं ३९ सूचिताबहवोनेनाद्विजाभुक्त्यर्थमागताः
तत्कारणंसमुद्दिश्यएषसूचिमुखस्मृतः ४० शीघ्रंगच्छतिविप्रेणयाचितःक्षुधितेनवै एतत्का

रणामुद्रिरूपशीघ्रगोयं द्विजोत्तम ४१ एकाकी मिष्टमश्नाति क्रुद्धः पोष्येषु नित्यशः ब्राह्मणो वृत्तयै
२१ वायं तेन रोधकनामकः ४२ पुराणं मौनमास्थाय यया चितो विलूत्वनभुवं तेन कर्मविपाकेन लेखं
न ३ कोनाम नामतः ४३ प्रेतत्वे कर्मभावैः संप्राप्ताः स्मो वयं द्विज मौनेन लेखको पातिरोधकः पर्वता
ननः शीघ्रगः पश्चुर्तीप्रामः सूचकः सूचिवक्त्रवान् ४४ अहं च केवलमीवः पश्यरूपविपर्यये
स्थितास्वहुचिरं कालं दुःखितावनरकार्णवे ४५ निःकाशितावयं सर्वे विलुनानरकार्णवा
21 त सर्वे न्चाविकृताताकारलंबोष्ठाविकृताननाः ४७ दीर्घदंताः स्थूलपादावक्राश्याः स्वेनक
र्मणा एतत्ते सर्वमाख्यातं प्रेतलोकारणमया ४८ ज्ञानिनस्तु वयं सर्वे सधः संदर्शनात्तव
यदि तेष्ववरोऽस्त्र दापट्क्षास्मान्पचादिच्छमि ४९ ब्राह्मण उवाच ये जीवा भुवि जीवंति सर्वे यस्मा-
हारमूलकाः युष्माकमपि चाहारं श्रोतुमिच्छामि तत्वतः ५० प्रेतराज उवाच शृणु चाहारमस्मा
कं सर्वे सत्वविगर्हितं यत्श्रुत्वा गर्हसे ब्रह्मन् भूयो भूयश्च गर्हितं ५१ श्लेष्ममूत्रपुरीषोत्थै राम
वीमितानां मलैस्तथा उच्छिष्टैश्चैव चान्यैश्च प्रेतानां भोजनं भवेत् ५२ महाशीत्यत्र शो ११

चानिविप्रकीर्णोष्टकानिच मलिनैरभिभूतानि प्रेताभुंजंतितत्रवै ५३ शौचंनास्तिगृहेयस्य
नसत्यंनचसंयमः पतितैर्दस्युभिर्युक्तं प्रेताभुंजंतितत्रवै ५४ बलिमंत्रविहीनानि होमहीनानि
यानिच स्वाध्यायव्रतहीनानि प्रेताभुंजंतितत्रवै ५६ यत्रलोभमतिक्रोधनिद्राशोकभयम
दः यत्रचाकालिकोमृत्युः प्रेताभुंजंतितत्रवै भर्तृहीनाचयानारी परवीर्यंनिषेवते तद्द्विजे
रक्तसंयुक्तं प्रेताभुंजंतितत्रवै ५८ लज्जानोजायतेतातवदतोभोजनेस्वकं निर्विष्टाःप्रेतभा
वेनएष्टामिलाहृढव्रत ५९ यथानभविताप्रेतस्तन्मेवदतपोधन नित्यमस्तुवर्जंतोःप्रेत
त्वंनचकविद्वरे ६० ब्राह्मणउवाच उपवासपरोनित्यंकृच्छ्रचांद्रायणैरतः व्रतैश्चविविधैः
पूतनप्रेतोजायतेनरः ६१ एकादश्यांव्रतंकुर्याज्जागरेणसमन्वितं किमन्यैःसुकृतैःप्रे
तनप्रेतोजायतेनरः ६२ [illegible] ष्टावैवाश्वमेधाहीनुहत्वादानानियोनरः देवोद्यानमथाराम
वापीकूपादिकारकः ६३ यःकुमारीब्राह्मणाय विवाहयतिशक्तितः देवो[illegible]
म[illegible]कृ विघा[illegible] नप्रेतोजयतेनरः ६४ मूढोन्नेचविष्णुक्तेतुजठरस्थेचयोमृ

[illegible]:१३१

दानस्तोयस्य१

नः क्षिपते वा पश्चात्सोपि सः प्रेतो जायते नरः ६५ अयाज्ययाजकश्चैव याज्यानां च विवर्जकः का
२२ लस्मिन्नुरतो नित्यं स प्रेतो जायते नरः ६६ श्री[illegible] उवाच एवं ब्रुवति वै विप्रे आकाशे दुंदुभिःस्व
नः प्रपतत्पुष्पवर्षं च देवैर्मुक्तं द्विजोपरि ६७ पंच देवविमानानि प्रेतानामागतानि च सर्वेग
22 ताविमाने स्थित्वा ते पुण्यं संसेव्य तं मुनि ६८ ज्ञानि विप्रस्य संभाषात्पुण्यस्य कीर्त्तनेन च प्रेताः पा
मे ५ पविनि[illegible]क्ताः परंपदमवाप्नुयुः ६९ सूत उवाच इदमाख्यानकं श्रुत्वा कंपितोश्वत्थप
त्रवत् मानुषाणां हितार्थाय गारुडः पृच्छते पुनः ७० गरुड उवाच विना मानुषदेहं तु प्रेतः
किं रूपवान्भवेत् वदंति किं प्रकर्त्तव्यं तद्वदस्व सुरेश्वर ७१ श्रीभगवानुवाच ये पापं कुर्वंति
ते प्रेताः पिशाचत्वं स्थवस्थिताः तेषां स्वरूपं वक्ष्यामि चिह्नं स्वप्ने यथा तथा ७२ क्षुत्पिपासा
र्दितास्ते वै प्रविशेयुः स्ववेश्मानि प्रविष्टा वायुदेहे तु शयानांस्तु स्ववंशजान् ७३ तत्र गत्वा
तु लिंगानि दर्शयंति खगेश्वर यत्र चापि कलत्राणि स्वबंधुर्यत्र तिष्ठति ७४ गवो हयो वा बा
वापि दृश्यते विह्वलाननः शयानं विपरीतं तु आत्मानं च विपर्ययं ७५ उत्थितः पश्यते पत्नी राम २२

तत्प्रेतैः क्रियते मन्त्रशं निगडैर्बध्यते पक्षि बध्यते बहुधा यदि ७६ अन्नस्य याचकः स्वप्ने क्षुवेषा
पूर्वदर्शनः भुंजानस्य च यः स्वप्ने गृहीत्वान्नं पलायते ७७ आत्मनः पक्षि परस्यापि तत्पात्रं पक्षि पिबे
ज्जलं वृषभारोहणं स्वप्ने वृषभैः सह गच्छति ७८ उत्पत्य गगनं यान्ति तीर्थं याति तत्पाशुरः स्व
वाचं वहते पक्षि गोवृषाद्विजवाजिषु ७९ हयेगजे तथा दृश्यन्ते प्रेत निशाचरे स्वप्नमध्ये तु प
हीड्प्रेतलिंगान्यनेकधा ८० स्वकलत्रं स्वबंधुं च स्वसुतं स्वपतिं विधुं विद्यमानं मृतं पश्येत्स्वप्ने न
दोषेणानिश्चितं ८१ याचते च परं स्वप्ने क्षुत्तृष्णाभ्यां च परिप्लुतः एवमन्यात्तु गृह्णाति प्रेतदोषैः स्वप्नपश्य
ति ८२ चिह्नान्येतानि पक्षीन्द्र विप्राय विनिवेदयेत् कृत्वा स्नानं गृहे तीर्थे श्रीवृक्षे च जलांजली
न् ८३ सप्तधान्यानि संपूज्य प्रदद्याद्वेदपारगे प्रेतं कुर्याद्यथाशक्त्या संपूर्णं पावयेत्सुधी ८४
स्वप्नाध्यायमिमं पक्षि प्रेतलिंगनिदर्शनं पठते [illegible] ति वापि प्रेतचिह्नं न पश्यति ८५ इति
श्रीगरुडपुराणे प्रेतकल्पे स्वप्नाध्यायो नामैकादशः ११ गरुड उवाच यदुक्तं ब्रह्मणा पूर्वं
वेदेषूक्तं तु यद्वाक्यं शतं जीवंति मानवाः १ जीवंति मानुषे लोके सर्वेषु
नानृतं तद्धि दृश्यते

२३ णो द्विजातयः अंत्यजा म्लेच्छजाश्चापि त्वं डेमारतसंतके २ कलौ तत्र प्रदृश्येत कस्माद्देवसमा
हिता आधानान्मृत्युमाप्नोति किं बालः स्थविरोऽथवा ३ सधनो निर्धनो वापि सुकुमारः सुरूपवान्
अविद्वांश्चैव विद्वांश्च ब्राह्मणः क्षत्रियोऽजनः ४ तपोरतो योगशीलो महाज्ञाननिचयो नरः सर्वज्ञान
23 रतः श्रीमान् धीमान् अतुलविक्रमः ५ सर्वमेतदशेषं तु जायते वसुधातले कस्मान्मृत्युमवाप्नो
ति राजा वा श्रोत्रियोऽपि वा ६ श्रीभगवानुवाच साधु साधु महाप्राज्ञ यत्त्वं भक्तोऽसि मे दृढः श्रूय
तां वचनं मह्यं नाना देहविनाशनं ७ विधात्रा विहितो मृत्युः शीघ्रमायाति गच्छति तत्र वक्ष्यामि
पक्षीन्द्र कारणं पश्य महाद्युते ८ मानुषः शतजीवी च पुरा वेदेन भाषितं विकर्मणः प्रभावेन
शीघ्रं चापि विनश्यति ९ वेदाभ्यासं न कुरुते चैव कुलाचारं न सेवते आलस्यात् कर्मणां त्यागो निषि
द्धे वादरः सदा १० यस्य यस्य गृहे श्नाति परस्त्रीरतस्तथा एतैरन्यैर्महादोषैर्जायते ह्यायुषः क्ष
यः ११ अश्रद्दधानमशुचिं नास्तिकं त्यक्तमंगलं द्वेवानं पतिसुव्यक्तमसत्यं च ममांदिरे १२ अ
रक्षितारं राजानं नित्यधर्मविवर्जितं क्रूरं व्यसनिनं मूर्खं वेदवादिविहिःकृतं १३ प्रजापीडन राम
२३

पुत्त्रं राजानं यमत्त्रासनं प्रापयेत्स्वयं शंम्भुरेतत्समं तं खगेश्वर १४ स्वकर्माणि परित्यज्य मुख्या
ज्ञानि यानि च परकर्मरतो वैश्यो यमलोके स गच्छति १५ शूद्रः करोति यः किं द्विजशुश्रूषणं विना
उत्तमाधममध्यं वा यमलोके स पच्यते १६ स्नानं दानं जपो होमः स्वाध्यायो देवतार्चनं यस्मिन्दि
नेन सेवेत स व्यथा दिवसो नराणां १७ अनित्यमध्रुवं देहमन्नाधारं रसोद्भवं अन्नोदकमयं कायं ये
गुणास्तान्वदाम्यहं १८ यस्मात्तः संचितं नूनं सा यं तच्च विनश्यति तदीयरससंपुष्टे काये का नाम म
नित्यता १९ सत्यं ज्ञात्वा त्वाद्य पक्षीन्द्र वपुर्नश्यं स्वकर्मभिः जन्मपाशविनाशाय कर्त्तव्यं परमोपर्थ
२० देहः किमन्नदातुर्वी निषेक्तुर्मातुरेव वा मातुः पितुर्वा बलिनः क्रेतुः स्मे शुनोऽपि वा २१ का
स्तत्र परमोपत्नः कृमिविड्भस्मसंज्ञके कर्त्तव्यः परमोपत्नः पातकस्य विनाशने २२ अनेकजन्म
संभूतं पातकं तु त्रिधा कृते यदा प्राप्नोति मानुष्यं तदा सर्वं च विंदति २३ मानुष्योदरवासी च य
दायतति भो द्विज अण्डजादिषु भूतेषु तत्र तत्र प्रसर्पति २४ सर्वजन्मानि संस्मृत्य विषादं कुरुत
चेतनः अवेक्ष्य गर्भवासांश्च कर्मजा गतयस्तथा २५ आधयो व्याधयः क्लेशा निजरूपविपर्य
यं गर्भवासाद्विनिर्मुक्तो ह्यज्ञानतिमिरावृतः २६ न पश्यति खगश्रेष्ठ बालभावं समाश्रितः

यौवनेतिमिरांधः स्वयः पश्यति समुक्तिभाक् २७ विनामानुषदेहंतु सुखंदुःखंनविंदति प्राकृतैः
२४ कर्मपाशैश्चैस्तन्मं सुप्राप्नोति मानवः २८ आधानात्पंचवर्षस्तु स्वल्पपापैर्विनश्यति पंचवर्षा
धिकोभूत्वामहापापैर्विपद्यते २९ योनिपूरयतेयस्मान्मृतोप्यापाति यातिच मृतोदानप्रभावे
णाजीवेन्मर्त्यश्चिरंभुवि ३० गरुडउवाच मृतेबालेकथंकुर्यात्पिंडदानादिकाः क्रियाः गर्भे
षुविप्रपन्नानामाचूडाकरणाच्छिशोः ३१ कथंकिंकेवदातव्यंमृतोतेकोविधिः स्मृतः पक्षीन्द्रव
चनंश्रुत्वाविष्णुर्वाक्यमथाब्रवीत् ३२ श्रीभगवानुवाच यदिगर्भोविपद्येतस्रवतेवापियो
षितः यावन्मासस्थितोगर्भस्तावद्दिनानिसूतकं ३३ तस्यकिंचिन्नकर्त्तव्यमात्मनः श्रेयइ
च्छता ततोजातेविपन्नेपि आचूडाकरणात्पुरा ३४ दुग्धभोज्यंयथाशक्त्याबालानांचप्रदी
